International Journal of Scientific Research in Science, Engineering and Technology
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 (www.ijsrset.com)

# धर्मलक्षणविमर्शः

**साधुः मुनिवत्सलदासः,**
गुरुवर्याः माधवप्रियदासजीस्वामिनः,
दर्शनम् संस्कृत संस्थानम् - SGVP, Ahmedabad, Gujarat, India



**Article Info**
Volume 7 Issue 6
Page Number: 301-304

**Publication Issue :**
November-December-2020

**Article History**
Accepted : 15 Dec 2020
Published : 30 Dec 2020

धर्मशब्द साम्प्रदायिको नास्ति । मुक्तिप्राप्तेः साधनमस्ति धर्मः । धर्म इति न कोऽपि बन्धनरूपम् अपितु धर्मस्तु अध्यात्मगगने विहारयितुं साधनरूपं वर्तते । धर्मः सङ्कुचिततां नैवोपयाति । विश्वं भवत्येक परिवार इत्यस्माकं आर्यसंस्कृतिः, अयं निजः परो वेति गणना तु लघुचेतसां कृते । तदुक्तं च विद्वद्भिः –

**अयं निजः परो वेति गणना लघुचेतसाम् ।**
**उदारचरितानां तु वसुधैव कुटुम्बकम् ।।**

अस्माकं संस्कृतिः केवलं तव, मम वाऽस्माकं कल्याणपर्यन्ता सीमिता नास्ति । यत्र आब्रह्मकीटपर्यन्तानां श्रेयं प्रकल्पितं सा अस्माकं वैदिकी संस्कृतिः ।

भारतीयसंस्कृतेः सभ्यता एवं सद्भावना सम्पूर्णस्य विश्वस्य कृते समाचरणीया । यस्यां संस्कृतौ सर्वेषां जीवप्राणिनां मङ्गलं प्रदर्शितम् । **सर्वे भवन्तु सुखिनः** इत्यत्र मम आवयोरस्माकमिति न केवलं स्वकीयानाम् अपितु पशु-पन्नगानां, जडचेतनानां सर्वेषां भद्रं अस्यां संस्कृतौ परिकल्पितम् । एतादृशी सद्भावना विश्ववन्दनीया ।

धर्मसम्प्रदाययोः मध्ये भेदो वर्तते । धर्मस्तु समुद्रवत् अपरिमितः, सम्प्रदायस्तु नदीवत् सीमितः । यथा सर्वाः नद्यः समुद्रमुपयान्ति तद्वत् सर्वेऽपि सम्प्रदायाः धर्ममुपयान्ति । धर्मात् सम्प्रदायाः सञ्जायन्ते, किन्धु सम्प्रदायेभ्यः धर्मो नैव समुद्भवति । धर्मस्तु चतुर्विधपुरुषार्थेषु प्रथमः । सम्प्रदायं धर्मरुपेण लोके वक्तुं शक्यते किन्तु धर्मं सम्प्रदायरुपेण नैवोपपादयितुं शक्यते । समुद्रात् नदीनां उत्पत्तिः शक्या, किन्तु नदीभ्यः समुद्रस्य कल्पना अशक्या ।

धर्मस्य व्याख्या सरला वर्तते किन्तु जीवने अनुसरणं सरलं नास्ति । यदि धर्मः अनुसरणे आगच्छेत् अर्थात् यदा मनुष्यैः धर्ममयजीवनं क्रियते तदेव धर्मस्य वास्तविकं स्वरूपं प्रकटति ।

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

"**धर्मो ज्ञेयः सदाचारः श्रुतिस्मृत्युपपादितः"**[1] इति भगवता श्रीस्वामिनारायणेन स्वलिखितायां शिक्षापत्र्यां धर्मस्य लक्षणं लक्षितम् । वास्तविकरूपेण सदाचार एव धर्मः । साम्प्रतसमये हिन्दु, इस्लाम, क्रिश्चन, शीख आदि धर्मान् अनुसरन्ति जनाः । तत्र साम्प्रदायिकं स्वातन्त्र्यमस्माकं राष्ट्रे । सर्वेऽपि जनाः स्वरुच्यनुसारं धर्ममनुसरन्ति तथापि सर्वे धर्माः जीवनमूल्यान् शीक्षयन्ति । मानवमूल्यानां प्रशिक्षणमेव परमो धर्मोपदेशः ।

**आचारः परमो धर्मः आचारः परमं तपः ।**
**आचारः परमं ज्ञानम् आचारात् किन्न साध्यते ? ।।**

अत्र शब्दत्रयम्, प्रथमः, धर्मः, आचारश्च । तत्र प्रथमो नाम आद्यः, धर्मशब्दश्चात्र कर्तव्यसूचकः, आचारश्च शास्त्रोपदेशान् अनतिक्रम्य वर्तनम्-आचरणद्योतकश्च ।

सर्वैरपि मन्वादिभिः स्मृतिकारैः धर्मलक्षणं प्रोक्तं यथा –

**श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।**
**एतच्चतुर्विधं प्राहुः साक्षात् धर्मस्य लक्षणम् ।।**[2]

याज्ञवल्क्योऽकथयत् – **शौचाचारांश्च शिक्षयेत् ।**[3] व्यासः वक्ति यत् – **आचारप्रभवो धर्मः धर्मस्य प्रभुरच्युतः ।**[4]
जैमिनी जगाद - **चोदनालक्षोऽर्थो धर्मः ।**[5]

अत्र सर्वत्र आचारस्य प्राधान्य नेत्रपथिकायते । अतः धर्मो आचारपर्याय एव । शब्दैः बोध्यते इति शब्दधर्मः, परन्तु न स तथा प्रभावकः यथा आचरणबोधः । अत एव भगवता श्रीकृष्णेन उक्तं गीतायाम् – **यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः ।**

**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।।**[6]

अर्थात् श्रेष्ठः पुरुषः यदाचरति, अन्ये जनाः तदेव अनुसरन्ति । सः यत् प्रमाणीक्रियते मनुष्याः तमेव आचरन्ति ।

अनेन महतां आचरणस्य अनुसरेणमेव आद्यः धर्म इत्येव प्रकाश्यते । यथा गुरुणा संध्यां करु, संध्यां कुरु इति प्रबोध्यमानोऽपि शिष्यः संध्यां कुर्यान्न वेति संशयः । परं तेन गुरुणा यदि संध्या आचर्यते तर्हि शिष्योऽवश्यमेव तमनुसरति । अयमेव आचारः प्रथमो धर्म इत्यस्य आशयः ।

आयुर्वेदमतेऽपि स्वास्थ्यहितान् आलोक्य दिनचर्यां, रात्रिचर्यां च यः सम्यक् आचरति, स मानवः सुखी भवति । अतः समष्टिरूपेण इदं सिद्धं यत् ऐहिकामुष्मिकसुखाय आचरणस्य सेवनं कर्तव्यमेव ।

**वृत्तं यत्नेन संरक्षेत् ।–** अत्र प्रोक्तं यत् आचरणस्य रक्षणे धनादिकविनाशेऽपि न काऽपि हानिः । यतोहि तस्य पुनः सम्भवात्, किन्तु अस्य एकवारमपि आचारः दूषितः भवति स पुमान् यावज्जीवं सम्मानगौरवं लब्धुं न समर्थः । अतोऽवादीत् वशिष्ठः – **आचारहीनं न पुनन्ति वेदाः ।**[7]

साम्प्रतं समाजे विचारभ्रष्टता, संस्कारभ्रष्टता, नीतिभ्रष्टता, शीलभ्रष्टता इत्यासु सर्वास्वपि भ्रष्टतासु प्रमुखं कारणं यत् आचारस्य लोप एव । अत आचारः परमो धर्म इति यदुक्तं तत् हिमालयवचनमेव ।

शास्त्रेषु उक्तान् सदाचारान् सर्वेऽपि जनाः सम्यक् परिजानन्ति तथापि सर्वेषां गतिः न तत्र। धर्मं ज्ञात्वाऽपि अधर्माचरणे प्रवृत्तमाना जनाः दुष्टाः । तस्य धर्मसम्बन्धिज्ञानं अज्ञानितः अधिकं निन्दनीयम्। प्रकोष्ठे अन्धकारं वर्तते चेत् दीपप्रज्वालनेन दूरीकर्तुं शक्यते तद्वत् यः अज्ञानी तस्य अज्ञानं ज्ञानप्रदानेन विनाशयितुं

शक्यते । यः शेते तस्योत्थापनं शक्यं किन्तु यः जाग्रन् शेते न तं कोऽपि उत्थापयितुं शक्नोति किन्तु यः धर्माधर्मं जानन्नपि दुर्मार्गे प्रवर्तते तस्य किं कर्तव्यम् ? अतः यः सदाचारी तमेव अनुसर्तव्यम् ।

पूर्वस्मिन् काले जनाः धर्मान्धाः आसन् । धर्मस्य आलम्बनेन धर्मोपदेशकाः जनान् वञ्चन्ति स्म। तान्त्रिकविद्यया अभिचारादिमन्त्रैः वा साधवः चमत्कारान् प्रदर्श्य जनान् आकर्षन्ति स्म । ते मूढाः जनाः अन्धश्रद्धया अन्धकारमये कूपे निपतन्ति, पापाचरणं कृत्वा नरके पतन्ति च ।

सर्वेषां मनुष्याणां कृते धर्मस्वातन्त्र्यं वर्तते । केचन स्वधर्मस्य गर्वमनुभवन्ति । धर्मस्य गौरवं तु श्लाघनीयः, गर्वस्तु निन्दनीयः। अभिमानेन जनाः अन्येषां धार्मिकपुरुषाणां निन्दां कुर्वन्ति । तेन च पापकर्मणा दुःखमनुभवन्ति । तस्मात् कस्यापि धर्मस्य निन्दा न कर्तव्या । स्वधर्मः श्रेष्ठः, इतरे कनिष्ठाः – इति मतिस्तु अयोग्या । पालनं स्वधर्मस्य भवतु, किन्तु सर्वधर्मान् प्रति सम्मानं आवश्यकम् ।

साम्प्रतकाले सर्वेऽपि आधुनिकाः मानवाः सुखार्थमेव यतन्ते । सुखप्राप्त्यर्थमेव सर्वाः प्रवृत्तयः । तथापि स्वल्पेनापि सुखेन सह आनुषङ्गिकरुपेण दुःखप्राप्तिः भवत्येव ।

संसारी अर्थोपार्जनाय शारीरिकं, मानसिकं बौद्धिकञ्च परिश्रमः करोति । तदर्थमपि सुखाय भवत्विति अपेक्षा सर्वेषाम् । सम्यक् अर्थोपार्जनेनापि सुखमनुभवति वा न वा ? इति तु विचारणीयो विषयः । तथापि बाल्यकालादेव यत्नशीलः मनुष्यः ।

ये सदाचारान् पालयन्ति, ते एव सुखिनः भवन्ति। आदर्शजीवननिर्माणाय सदाचारपालनमनिवार्यम् । भगवता श्रीस्वामिनारायणेन शिक्षापत्र्यामुल्लिखितं यत् –

**“ये पालयन्ति मनुजाः सच्छास्त्रप्रतिपादितान् ।**
**सदाचारान् सदा तेऽत्र परऽत्र च महासुखाः ।।**[8]

अर्थात् ये जनाः सच्छास्त्रेषु आत्मकल्याणाय प्रतिपादितान् अहिंसादिन् सदाचारान् पालयन्ति ते इहलोके अमुष्मिन् लोके च सुखिनः भवन्ति। धर्मनिष्ठपुरुषः हीनजातिकुलोत्पन्नो वा भवतु, किन्तु सः ब्रह्मादिभिरपि पूज्यः। तदुक्तं श्रीमद्सत्सङ्गिजीवने यत् –

**धर्मनिष्ठस्तु पुरुषो हीनजातिकुलोऽपि यः ।**
**सोऽपि ब्रह्मादिभिः पूज्यः श्लाघनीयश्च जायते ।।**[9]

सदाचारणमेव सुखहेतुः । तर्हि को नाम सदाचारः ? इति चेत् सताम् आचार इति सदाचारः अथवा सद आचरन्तीति सदाचारः। अर्थात् साधुपुरुषाः यदाचरन्ति स एव सदाचारः ।

ईश्वानुगामिनां क्रिश्चनजनानां **बाईबल** इति नाम्ना प्रसिद्धे धर्मग्रन्थे उक्तं यते -

**“People become great with their conduct, They become mean with their misconduct.”**

अर्थात् सदाचारपालनेन प्रजाः सुखिनः भवन्ति, दुराचरणेन दुःखिनः भवन्ति ।

अस्मिन् संसारे नेके बुद्धिमन्तः जनाः। स्वस्वक्षेत्रेषु कृतभूरिपरिश्रमाः प्राप्तमहोपाधयः तथापि आत्मकल्याणाय निष्फलतां प्राप्तवन्तः । इह संसारे द्विप्रकारकाः जनाः सन्ति, सद्बुद्धयः दुर्बुद्धयश्च। ये आत्मकल्याणाय यतन्ते ते सद्बुद्धयः, केवलमर्थोपार्जनाय एव सर्वा प्रवृत्तयः ते दुर्बुद्धयः ।

भगवता श्रीस्वामिनारायणेन शिक्षापत्री इति नाम्ना प्रसिद्धः स्मृतिग्रन्थः विरचितः । एषः ग्रन्थः श्रीस्वामिनाराणसम्प्रदायस्य आचारसंहिता इति नाम्ना प्रसिद्धः । एतस्य लघुग्रन्थस्योपरि सम्प्रदायस्य विदुषा शतानन्दमुनिना विस्तृतं भाष्यं लिखितम् । तत्र भाष्ये कुबुद्धिसुबुद्धियुक्तयोः मध्ये को भेदः ? इति स्पष्टमुक्तम् । तत्र प्रतिपादितं यत् – **ये शास्त्रविधिमनुसरन्ति ते सद्बुद्धियुक्तः, ये च शास्त्रमर्यादामुत्सर्ज्य वर्तन्ते ते कुबुद्धयः ।**

एवं सुखप्राप्तये धर्मपालनमावश्यकम् । धर्मः मानवस्य छाया इव शोभते । यथा प्राणेन विना शरीरं निश्चेतनम् तद्वत् धर्मं विना जीवनं निरर्थकं भवति ।

लोकेऽपि वयं पश्यामः यत् ये जनाः गौरवं प्राप्तवन्तः उत्कृष्ट पद-प्रतिष्ठां प्राप्तवन्तः, ते सन्मार्गे एव गतवन्तः ।

**वेदाः विभिन्नाः स्मृतयो विभिन्नाः नाऽसौ मुनिः यस्य मतं न भिन्नम् ।**
**धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः ।।**[10]

यस्मिन् मार्गे ते प्राप्तप्रतिष्ठाः तन्मार्गे अन्येऽपि चलन्ति । स महापुरुषः अनेकेषां आदर्शरुपेण प्रतिष्ठितो भवति तथा च तेन चितो मार्गः सर्वेषां कृते गन्तव्यो भवति ।

**सन्दर्भग्रन्थाः –**

(1) शिक्षापत्री-103
(2) मनुस्मृति-2-12
(3) याज्ञवल्क्यस्मृति-1-15
(4) नारदपुराण पूर्वखण्ड-4-22
(5) मीमांसासूत्र-2
(6) श्रीमद्भगवद्गीता-3-21
(7) वशिष्ठ स्मृति-6-3, देवीभागवत-11-2-1
(8) शिक्षापत्री-8
(9) सत्सङ्गिजीवनम्-1-33-3
(10) महाभारत वनपर्व-267-84